श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ चतुश्चत्वारिंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ चतुश्चत्वारिंशः सर्गः ॥

## रात्रौ वानराणां रक्षसां च घोरं युद्धं अङ्गदेनेन्द्रजित्पराजयो मायातोऽदृश्यमानेनेन्द्रजिता श्रीरामलक्ष्मणयोर्नागपाशैर्बन्धनम्

युध्यतामेव तेषां तु तदा वानररक्षसाम्।
रविरस्तं गतो रात्रिः प्रवृत्ता प्राणहारिणी ॥ **6.44.1** ॥

अन्योन्यं बद्धवैराणां घोराणां जयमिच्छताम्।
सम्प्रवृत्तं निशायुद्धं तदा वानररक्षसाम् ॥ **6.44.2** ॥

राक्षसोऽसीति हरयो वानरोऽसीति राक्षसाः।
अन्योन्यं समरे जघ्नुस्तस्मिंस्तमसि दारुणे ॥ **6.44.3** ॥

हत दारय चैहीति कथं विद्रवसीति च।
एवं सुतुमुलः शब्दस्तस्मिन् सैन्ये तु शुश्रुवे ॥ **6.44.4** ॥

कालाः काञ्चनसन्नाहास्तस्मिंस्तमसि राक्षसाः।
सम्प्रदृश्यन्त शैलेन्द्रा दीप्तौषधिवना इव ॥ **6.44.5** ॥

तस्मिंस्तमसि दुष्पारे राक्षसाः क्रोधमूर्च्छिताः।
परिपेतुर्महावेगा भक्षयन्तः प्लवङ्गमान् ॥ **6.44.6** ॥

ते हयान् काञ्चनापीडान् ध्वजांश्चाशीविषोपमान्।
आप्लुत्य दशनैस्तीक्ष्णैर्भीमकोपा व्यदारयन् ॥ **6.44.7** ॥

वानरा बलिनो युद्धेऽक्षोभयन् राक्षसी चमूम्।
कुञ्जरान् कुञ्जरारोहान् पताकाध्वजिनो रथान्॥ **6.44.8** ॥

चकर्षुश्च ददंशुश्च दशनैः क्रोधमूर्च्छिताः।
लक्ष्मणश्चापि रामश्च शरैराशीविषोपमैः॥ **6.44.9** ॥

दृश्यादृश्यानि रक्षांसि प्रवराणि निजघ्नतुः।
तुरङ्गखुरविध्वस्तं रथनेमिसमुत्थितम्॥ **6.44.10** ॥

रुरोध कर्णनेत्राणि युध्यतां धरणीरजः।
वर्तमाने तथा घोरे सङ्ग्रामे लोमहर्षणे।
रुधिरौघा महाघोरा नद्यस्तत्र विसुस्रुवुः॥ **6.44.11** ॥

ततो भेरीमृदङ्गानां पणवानां च निःस्वनः।
शङ्खनेमिस्वनोन्मिश्रः सम्बभूवाद्भुतोपमः॥ **6.44.12** ॥

हतानां स्तनमानानां राक्षसानां च निःस्वनः।
शस्तानां वानराणां च सम्बभूवात्र दारुणः॥ **6.44.13** ॥

हतैर्वानरमुख्यैश्च शक्तिशूलपरश्वधैः।
निहतैः पर्वताकारै राक्षसैः कामरूपिभिः॥ **6.44.14** ॥

शस्त्रपुष्पोपहारा च तत्रासीद् युद्धमेदिनी।
दुर्ज्ञेया दुर्निवेशा च शोणितास्त्रावकर्दमा॥ **6.44.15** ॥

सा बभूव निशा घोरा हरिराक्षसहारिणी।
कालरात्रीव भूतानां सर्वेषां दुरतिक्रमा॥ **6.44.16** ॥

ततस्ते राक्षसास्तत्र तस्मिंस्तमसि दारुणे।
राममेवाभ्यवर्तन्त संहृष्टाः शरवृष्टिभिः॥ **6.44.17** ॥

तेषामापततां शब्दः क्रुद्धानामपि गर्जताम्।
उद्धर्त इव सप्तानां समुद्राणामभूत् स्वनः॥ **6.44.18** ॥

तेषां रामः शरैः षड्भिः षड् जघान निशाचरान्।
निमेषान्तरमात्रेण शरैरग्निशिखोपमैः॥ **6.44.19** ॥

यज्ञशत्रुश्च दुर्धर्षो महापार्श्वमहोदरौ।
वज्रदंष्ट्रो महाकायस्तौ चोभौ शुकसारणौ॥ **6.44.20** ॥

ते तु रामेण बाणौघैः सर्वमर्मसु ताडिताः।
युद्धादपसृतास्तत्र सावशेषायुषोऽभवन्॥ **6.44.21** ॥

निमेषान्तरमात्रेण घोरैरग्निशिखोपमैः।
दिशश्चकार विमलाः प्रदिशश्च महारथः॥ **6.44.22** ॥

ये त्वन्ये राक्षसा वीरा रामस्याभिमुखे स्थिताः।
तेऽपि नष्टाः समासाद्य पतङ्गा इव पावकम्॥ **6.44.23** ॥

सुवर्णपुङ्खैर्विशिखैः सम्पतद्भिः समन्ततः।
बभूव रजनी चित्रा खद्योतैरिव शारदी॥ **6.44.24** ॥

राक्षसानां च निनदैर्भेरीणां चैव निःस्वनैः।
सा बभूव निशा घोरा भूयो घोरतराभवत्॥ **6.44.25** ॥

तेन शब्देन महता प्रवृद्धेन समन्ततः।
त्रिकूटः कन्दराकीर्णः प्रव्याहरदिवाचलः॥ **6.44.26** ॥

गोलाङ्गूला महाकायास्तमसा तुल्यवर्चसः।
सम्परिष्वज्य बाहुभ्यां भक्षयन् रजनीचरान्॥ **6.44.27** ॥

अङ्गदस्तु रणे शत्रून् निहन्तुं समुपस्थितः।
रावणिं निजघानाशु सारथिं च हयानपि॥ **6.44.28** ॥

इन्द्रजित् तु रथं त्यक्त्वा हताश्वो हतसारथिः।
अङ्गदेन महाकायस्तत्रैवान्तरधीयत ॥ **6.44.29** ॥

तत् कर्म वालिपुत्रस्य सर्वे देवाः सहर्षिभिः।
तुष्टुवुः पूजनार्हस्य तौ चोभौ रामलक्ष्मणौ ॥ **6.44.30** ॥

प्रभावं सर्वभूतानि विदुरिन्द्रजितो युधि।
ततस्ते तं महात्मानं दृष्ट्वा तुष्टाः प्रधर्षितम् ॥ **6.44.31** ॥

ततः प्रहृष्टाः कपयः ससुग्रीवविभीषणाः।
साधुसाध्विति नेदुश्च दृष्ट्वा शत्रुं पराजितम् ॥ **6.44.32** ॥

इन्द्रजित् तु तदानेन निर्जितो भीमकर्मणा।
संयुगे वालिपुत्रेण क्रोधं चक्रे सुदारुणम् ॥ **6.44.33** ॥

सोऽन्तर्धानगतः पापो रावणी रणकर्शितः।
ब्रह्मदत्तवरो वीरो रावणिः क्रोधमूर्च्छितः ॥ **6.44.34** ॥

अदृश्यो निशितान् बाणान् मुमोचाशनिवर्चसः।
रामं च लक्ष्मणं चैव घोरैर्नागमयैः शरैः ॥ **6.44.35** ॥

बिभेद समरे क्रुद्धः सर्वगात्रेषु राक्षसः।
मायया संवृतस्तत्र मोहयन् राघवौ युधि ॥ **6.44.36** ॥

अदृश्यः सर्वभूतानां कूटयोधी निशाचरः।
बबन्ध शरबन्धेन भ्रातरौ रामलक्ष्मणौ ॥ **6.44.37** ॥

तौ तेन पुरुषव्याघ्रौ क्रुद्धेनाशीविषैः शरैः।
सहसाभिहतौ वीरौ तदा प्रेक्षन्त वानराः ॥ **6.44.38** ॥

प्रकाशरूपस्तु यदा न शक्त -
    स्तौ बाधितुं राक्षसराजपुत्रः।

**मायां प्रयोक्तुं समुपाजगाम**
**बबन्ध तौ राजसुतौ दुरात्मा ॥ 6.44.39 ॥**

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे चतुश्चत्वारिंशः सर्गः ॥